श्री गुरुचरणकमलेभ्यो नमः

संकटनाशक स्तोत्र

श्रीगणेशाय नमः | नारद उवाच | प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् |
भक्त्या व्यासः स्मरेन्नित्यमायुःकामार्थसिद्धये || १ ||

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् |
तृतीयं कृष्ण पिङ्गाक्षं गजवक्त्रं चतुर्थकम् || २ ||

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च |
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम् || ३ ||

नवमं भालचंद्रं च दशमं तु विनायकम् |
एकादशं गणपतिं द्वादशं तु गजाननम् || ४ ||

द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः |
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो || ५ ||

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् |
पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् || ६ ||

जपेद् गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् |
संवत्सरेण सिद्धिं चं लभते नात्र संशयः || ७ ||

अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् |
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः || ८ ||

इति श्रीनारदपुराणे संकटनाशनस्तोत्रं संपूर्णम् |

****